# Shri Shrishankara Stotram

# श्री श्रीशाङ्करस्तोत्रम्

## Document Information

```
Text title : Shankara Stotram
File name : shankarastotram3.itx
Category : shiva
Location : doc_shiva
Transliterated by : Vani V
Proofread by : Vani V
Latest update : March 19, 2022
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 19, 2022

*sanskritdocuments.org*

# श्री श्रीशङ्करस्तोत्रम्

सर्वेश्वरं सर्वमन्तवीर्यं विश्वार्तिनाशं गिरिशं सुरेशम् ।
गुणैर्विहीनं त्रिगुणात्मकं च नमामि तं ज्ञानदयं महेशम् ॥ १॥

वाराणसीक्षेत्र-विहारदक्षं त्रिलोकवन्द्यं हरिभक्तकान्तम् ।
जगद्गुरुं संयमिनं दयालुं नमामि तं ज्ञानदयं महेशम् ॥ २॥

गङ्गोर्मिशोभं द्विजराजमौलिं शुद्धप्रदीप्तं रुचिरास्थिमालम् ।
जटाधरं भस्मविभूषिताङ्गं नमामि तं ज्ञानदयं महेशम् ॥ ३॥

कटोपिनद्धाजिनमादिदेवं हलाहलादं पितृकाननस्थम् ।
कराक्षसूत्रं वृषराजकेतं नमामि तं ज्ञानदयं महेशम् ॥ ४॥

गौरीप्रियं दक्षमखान्तमाद्यं कारुण्यपूर्णं भवभीतिनाशम् ।
पापौघनाशं स्मरविग्रहान्तं नमामि तं ज्ञानदयं महेशम् ॥ ५॥

वाणेश्वरं वह्निरवीन्दुनेत्रं भीमं मृडं शान्तगुणादिभूषम् ।
स्वयम्भुवं दूरितकालभीतिं नमामि तं ज्ञानदयं महेशम् ॥ ६॥

कैलासनाथं प्रमथाधिनाथं सुरासुरैरर्चितपादयुग्मम् ।
तेजोमयं शूलपिनाकपाणिं नमामि तं ज्ञानदयं महेशम् ॥ ७॥

दुःखान्तकं सर्वसुखस्वरूपमभव्यशीलं शिवदं शिवेशम् ।
मृत्युञ्जयं मृत्युपतेः कृतान्तं नमामि तं ज्ञानदयं महेशम् ॥ ८॥

प्रसीद शम्भो ! हर ! रुद्र ! भद्र ! स्कन्दाशिवध्वंसपितः शरण्य ।
भूदेववंशप्रभवे कुबुद्धौ रामेन्द्रनाथे मयि रुद्रनाथ ! ॥ ९॥

इति श्री श्रीशङ्करस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Vani V.

*Shri Shrishankara Stotram*

pdf was typeset on March 19, 2022

Please send corrections to *sanskrit@cheerful.com*